# નિર્વાણ–ષટ્કમ્

મનોબુદ્ધયહંકારચિત્તાનિ નાહં
ન ચ શ્રોત્રજિહ્વે ન ચ ઘ્રાણનેત્રે ।
ન ચ વ્યોમભૂમી ન તેજો ન વાયુઃ
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૧ ।।

ન ચ પ્રાણસંજ્ઞો ન વૈ પઞ્ચવાયુઃ
ન વા સપ્તધાતુર્ન વા પઞ્ચકોશઃ ।
ન વાક્પાણિપાદં ન ચોપસ્થપાયૂ
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૨ ।।

ન મે દ્વેષરાગૌ ન મે લોભમોહૌ
મદૌ નૈવ મે નૈવ માત્સર્યભાવઃ ।
ન ધર્મો ન ચાર્થો ન કામો ન મોક્ષઃ
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૩ ।।

ન પુણ્યં ન પાપં ન સૌખ્યં ન દુઃખં
ન મન્ત્રો ન તીર્થં ન વેદા ન યજ્ઞાઃ ।
અહં ભોજનં નૈવ ભોજ્યં ન ભોક્તા
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૪ ।।

ન મે મૃત્યુશંકા ન મે જાતિભેદઃ
પિતા નૈવ મે નૈવ માતા ન જન્મ ।
ન બન્ધુર્ન મિત્રં ગુરુર્નૈવ શિષ્યઃ
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૫ ।।

અહં નિર્વિકલ્પો નિરાકારરૂપો
વિભુત્વાચ્ચ સર્વત્ર સર્વેન્દ્રિયાણામ્ ।
સદા મે સમત્વં ન મુક્તિર્ન બન્ધઃ
ચિદાનન્દરૂપં શિવોઽહં શિવોઽહમ્ ।। ૬ ।।